एकादशः पाठः

# महाभिनिष्क्रमणम्

**पुरा भारतवर्षे कपिलवस्तुनाम्नि नगरे शुद्धोदनो नाम राजा अभवत्। तस्य पुत्रः सिद्धार्थः आसीत्। अयं गौतम इति वंशनाम्ना ख्यातः आसीत्। सिद्धार्थः सांसारिकभोगानां नश्वरतां, प्राणिनां कष्टानि च अवलोक्य राज्यभोगात् विरक्तः जातः। अयमेव सिद्धार्थः अनन्तरं गौतमबुद्ध इति नाम्ना प्रसिद्धः अभवत्। पुराणेषु एषः विष्णोः अवतारः अपि कथ्यते।**

**नाट्यांशोऽयम् सिद्धार्थस्य परिव्रज्याग्रहणपूर्वस्य मानसिक–अवस्थां प्रकटयति।**

**सिद्धार्थः** - (स्वगतं चिन्तयन्) हन्त। कियती विडम्बना मानवशरीरस्य। वासन्तिकं यौवनं, कुसुमसुकुमारमनोहरा देहसम्पत्, किमिदं सर्वं स्थिरम् ? किं यशोधरायाः यौवनमचलम् ? किं जरा व्याधिर्मृत्युश्च मदीया अन्तःपुरपरिचारिकाः कदापि नाक्रमिष्यन्ति ? किमेता न जानन्ति यद्यौवनं चपलम् ? जरा रूपं नाशयिष्यति।

**यशोधरा** - कुमार ! कुमार, किं चिन्तयति भवान् ?

**सिद्धार्थः** - न किमपि यशोधरे ! उद्विग्नमिव मे चेतः। इत एहि अत्रोपविश। इदमेव विलोक्य आश्चर्यम् अनुभवामि यशोधरे यत् वयं मनुष्याः प्रतिदिनं ग्रसन्तीं मृत्युराक्षसीं जानन्तोऽपि न शोचामः। अद्य न जाने मदीये हृदये कश्चन् वक्ति यत् जरां व्याधिं मृत्युं च विजित्यैव मनुष्यस्य यौवनं विलासश्च शोभते। नृत्यसङ्गीत-वादित्रेषु नानुरञ्ज्यामि, न च तुष्यामि क्रीडोद्यानद्रुमैः, प्रेक्षागृहपञ्जरैः, स्नानगृहनिर्झरैः।

**यशोधरा** - तर्हि कुमार ! किं व्यवसीयते भवता ?

**सिद्धार्थः** - इदमेव वाञ्छामि यशोधरे, यदधुना परिव्राजको भूत्वा मृत्योर्निग्रहाय तपश्चरेयम्।

**यशोधरा** - किमिदं भाषते भवान् ? परिव्रज्यायाः नायं समयः। कतिपयमासेभ्यः पूर्वमेव तु भवान् शाक्यवंशधरस्य कुमार-राहुलस्य जनकः सञ्जातोऽस्ति। आगच्छतु भवान् अद्य कुमार-राहुलस्य अभिनिष्क्रमणसंस्कारः।

**सिद्धार्थः** - न किमपि इच्छामि यशोधरे। अद्यैव प्रव्रज्यायै अनुमतिं ग्रहीतुं महाराजस्य सौधमुपसर्पामि। अद्यैव प्रव्रज्यायै अनु .........।

**यशोधरा** - (तारस्वरेण) कुत्र प्रयाति कुमारः ? कुमार ! कुमार !

**(दृश्यपरिवर्तनम्)**

**सिद्धार्थः** - आर्य ! अभिवादये।

**शुद्धोदनः** - सिद्धार्थ ! शाक्यवंशधरो भव।

**सिद्धार्थः** - आर्य ! अद्य एकामनुज्ञां ग्रहीतुं समुपस्थितोऽस्मि। अहं जानामि यदाजन्म महाराजस्य मह्यं किमप्यदेयं नास्ति।

**शुद्धोदनः** - निश्शङ्कं ब्रूहि सिद्धार्थ ! मम प्राणा अपि त्वदधीनाः कुमार !

**सिद्धार्थः -** महाराज ! सुबहु मया विचारितं प्रजानां लोकयात्रार्थम् । अधुना शोकमृत्युभयानां निग्रहाय तपश्चिकीर्षामि । प्रव्रज्यायै अनुज्ञातुमर्हति मां महाराजः ।

**(कोलाहलो वर्धते, आश्चर्यम्, आश्चर्यम् इति ध्वनयश्च)**

**शुद्धोदनः -** कुमार सिद्धार्थ ! किमिदं व्यवसितं त्वया ? न हि कालस्ते प्रव्रज्यां ग्रहीतुम् । प्रथमे वयसि चलायां मतौ धर्मचर्या बहु दोषा भवति । मया हि तव कुतूहलार्थं क्रीडोद्याने सर्वापि विनोदसामग्री समुदपस्थापिता । चित्रं मनोज्ञेऽपि विषये तव रतिर्न जायते ।

**सिद्धार्थः -** आर्य ! जरा व्याधिश्च मृत्युश्च यदि न स्युस्तर्हि मम मनोज्ञेषु विषयेषु रतिर्भवेत् । असंशयं मृत्युरिति जानतोऽपि यस्य हृदि रागो जायते तस्य चेतना लोहमयीमेव उत्प्रेक्षे ।

**शुद्धोदनः -** कुमार ! कस्त्वामिदं बोधितवान् ? तवेदं सुकुमारं वयः प्रसन्नसुन्दरं च वपुः किं प्रव्रज्यायै भगवता सृष्टम् ? नायं कालस्तव तपोवनाश्रयस्य । गच्छ क्रीडोपवनम् । अनुभव नृत्यवादित्रविनोदम् ।

**सिद्धार्थः -** कथमहं चेतनां वञ्चयेयमार्य । यदि भवान्मे प्रतिभूर्भवति यन्मम जीवनं मरणाय न सृष्टमस्ति, मम शरीरं रोगेभ्यः सर्वदा मुक्तं स्यात्, मम यौवनं च जरा न कदाप्याक्षिपेत्, तर्हि अहं तपोवनं न श्रयिष्ये ।

**सूत्रधारः -** संसारस्य निःसारता, जनन-मरण-चक्रस्य बन्धनं, मानुषी गतिः, सर्वमिदं विचिन्त्य सिद्धार्थो व्यरज्यत लोकयात्रातः । सकृन्निशीथे तेन व्यवसितं यत्सर्वमिदं प्रपञ्चं परित्यज्य जननमरणयोः पारं द्रष्टुं स तपस्तप्स्यति, साधनां विधास्यति, जीवनरहस्यं बोद्धुं प्रयतिष्यते । (इति निष्क्रान्तः सर्वे)

## शब्दार्थः

स्वगतम् - मन ही मन । जरा - बुढ़ापा । ग्रसन्तीम् - खाती हुई को । शोचामः - हम सोचते हैं । मृत्युराक्षसीम् - मृत्यु रूपी राक्षसी को । मदीये - मेरे । व्याधिम् - बीमारी को । विजित्यैव - जीतकर ही । नानुरज्यामि - प्रसन्न नहीं होता हूँ । प्रेक्षागृहपञ्जरैः - नाट्य शाला/रङ्ग शाला के पात्रों से । स्नानगृहनिर्झरैः - स्नानगृह के झरनों से । वाञ्छामि - चाहता हूँ। परिव्राजकः - संन्यासी । मृत्योर्निग्रहाय - मृत्यु को पराजित करने के लिए । सौधमुपसर्पामि - महल में जाऊँगा । तारस्वरेण - ऊँचे स्वर में । प्रयाति - जाता है । सुबहु - बहुत बार, अच्छी तरह से । तपश्चिकीर्षामि - तप करने की इच्छा करता हूँ। श्रयिष्ये - आश्रय ग्रहण करूँगा । बोद्धुम् - जानने के लिए ।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**

(क) का रूपं नाशयिष्यति ?

(ख) सिद्धार्थः कस्य पुत्रः आसीत् ?

(ग) यशोधरा कस्य पत्नी आसीत् ?

(घ) सिद्धार्थस्य पुत्रः कः आसीत् ?

(ङ) सिद्धार्थः कस्मिन् वंशे उत्पन्नः अभूत् ?

**2. एकवाक्येन उत्तरं लिखत -**

(क) कस्य अभिनिष्क्रमणसंस्कार: अस्ति ?

(ख) सिद्धार्थ: अनुज्ञां प्राप्तुं कस्य समीपं गत: ?

(ग) सिद्धार्थ: केषु नानुरञ्ज्यति ?

(घ) वयं मनुष्या: कां जानन्तोऽपि न शोचाम: ?

(ङ) मनुष्यस्य यौवनं विलासश्च कदा शोभते ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) यशोधरा तारस्वरेण सिद्धार्थं किम् उक्तवती ?

(ख) सिद्धार्थ: किमर्थं लोकयात्रात: व्यरज्यत ?

(ग) मनोज्ञेषु विषयेषु रतिविषये सिद्धार्थ: शुद्धोदनं किम् अकथयत् ?

**4. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्ध वाक्यानां समक्षं ''न'' इति लिखत -**

(क) शुद्धोदन: राहुलस्य पिता आसीत्। ☐

(ख) यशोधरा राहुलस्य माता आसीत्। ☐

(ग) सिद्धार्थ: प्रव्रज्यार्थम् इच्छति। ☐

(घ) सिद्धार्थ: यशोधराया: अनुज्ञां प्राप्तुं गत:। ☐

(ङ) शुद्धोदन: शाक्यवंशीय: न आसीत्। ☐

**5. अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा-हृदये | हृदय | सप्तमीविभक्ति: | एकवचनम् |
| (क) मया | | | |
| (ख) प्रव्रज्यायै | | | |
| (ग) मनुष्यस्य | | | |
| (घ) वयसि | | | |
| (ङ) मतौ | | | |

**6. अधोलिखितपदानां धातुं लकारं च लिखत -**

| पदम् | धातु: | लकार: |
|---|---|---|
| यथा -भाषते | भाष् | लट्लकार: (आत्मनेपदी) |
| (क) जायते | | |
| (ख) प्रयतिष्यते | | |
| (ग) वर्धते | | |
| (घ) शोभते | | |

7. **अधोलिखितपदानां धातुं प्रत्ययञ्च पृथक्कुरुत -**

| पदम् | धातुः | प्रत्ययः |
|---|---|---|
| यथा -विजित्य | वि + जि + | ल्यप्। |

(क) ग्रहीतुम्

(ख) विचिन्त्य

(ग) बोद्धुम्

(घ) द्रष्टुम्

(ङ) परित्यज्य

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | | सन्धिविच्छेदः | | सन्धिनाम |
|---|---|---|---|---|
| यथा -अद्यैव | = | अद्य + एव | = | वृद्धिसन्धिः। |

(क) समुपस्थितोऽस्मि

(ख) किमप्यदेयम्

(ग) तपश्चरेयम्

(घ) सकृन्निशीथे

(ङ) क्रीडोपवनम्

9. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत -**

(क) धर्मचर्या

(ख) क्रीडोद्यानम्

(ग) विनोदसामग्री

(घ) लोकयात्रा

(ङ) महाराजः

10. **रेखाङ्कितसंज्ञाशब्दानां स्थाने सर्वनामशब्दानां प्रयोगं कुरुत -**

(क) **राहुलः** शाक्यवंशधरः आसीत्।

(ख) **यशोधरा** सिद्धार्थस्य पत्नी आसीत्।

(ग) **सिद्धार्थस्य** पिता शुद्धोदनः आसीत्।

(घ) **सिद्धार्थः** परिव्राजकः अभवत्।

(ङ) सिद्धार्थः **राहुलस्य** जनकः आसीत्।

## योग्यताविस्तारः -

- सिद्धार्थस्य विस्तृतजीवनचरितम् अन्विष्य लिखत।
- अस्य नाट्यांशस्य सामूहिकम् अभिनयं कुरुत।